National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(48): 186-188
© 2023 NJHSR
www.sanskritarticle.com

टि.वि.के.बाल हनुमान्
शोधच्छात्रः, ज्योतिषविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

Correspondence:
टि.वि.के.बाल हनुमान्
शोधच्छात्रः, ज्योतिषविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# सिद्धान्तसुन्दरदिशा शृङ्गोन्नतिविमर्शः

टि.वि.के.बाल हनुमान्

भूस्थाः वयं यद्यपि रात्रिवेलायां प्रतिदिनम् आकाशस्थं चन्द्रमसं दृष्ट्वा मुदामः तथापि अस्माकं मनसि सर्वदा कश्चन प्रश्नः भवत्येव यत् चन्द्रस्य कलानां वृद्धिः क्षयो वा कथं भवति किमत्र रहस्यमिति। अस्मिन् विषये बहूनि लौकिकानि समाधानानि उपलभ्यन्ते। परं सैद्धान्तिकमतं तु इत्थं वर्त्तते - चन्द्रमसः स्वस्य प्रकाशः न विद्यते सूर्यकिरणवशादेव चन्द्रः प्रकाशते इति विदितविषयमेव। अत्रायं विशेषः यत् यद्यपि सूर्यकिरणाः चन्द्रस्योपरि सर्वदा समानया रीत्या भवन्ति तथापि चन्द्रः गतियुक्तः इत्यत अस्माभिः दृक्सूत्रगतस्य चन्द्रस्य सर्वदा एक एव भागः न दृश्यते। तस्मात् एकस्मिन् पक्षकाले इन्दोः विभिन्नाः शुक्लाकृतयः दृश्यन्ते। तत्र पक्षादौ मासान्ते च चन्द्रस्य शुक्लभागो वारद्वयं शृङ्गाकृतौ दृश्यते। एतादृशः चन्द्रशृङ्गस्य नतोन्नतवशात् संहिताग्रन्थेषु बहुविधानि फलानि प्रोक्तानि। तादृशः महत्वोपेतस्य चन्द्रशृङ्गस्य साधानविधिं सिद्धान्तग्रन्थेषु बहवः आचार्याः न्यरूपयन्।

ज्ञानराजेन विरचिते सिद्धान्तसुन्दराख्ये ग्रन्थविशेषे शृङ्गोन्नत्यधिकारे आदौ चन्द्रस्य कलानां वृद्धिह्रासे हेतुं प्रदीयते। तत्रोक्तं यत् प्रतापवतः राज्ञः यो मन्त्री तस्य निजबलाभावेऽपि राज्ञः प्रतापवशात् प्राप्तेन बलेन शत्रून् हन्तुं यथाग्रसरो भवति तद्वत् प्रकृतेऽपि स्वकीयैः प्रचण्डैः किरणैः प्रतापवान् सूर्यः इतरप्रकाशवतां ग्रहाणां प्रकाशं हृत्वा स्वयं नक्षत्रमण्डले राराजते। चन्द्रः सूर्यस्य प्रकाशेन युक्तः सन् स्ववेगगत्या राज्ञः अग्रे वा पृष्ठे वा भूत्वा तस्य शत्रुरूपिणं तमः हन्तुं प्रयतते। तदेवात्र उच्यते -

**राजा पुष्करमण्डले दिनकरस्तीव्रप्रतापान्वितो**
**मन्त्रीतत्प्रतिबिम्बसम्भृतकलापूर्णः सुधामण्डलः।**
**युक्तस्तत्करमुद्रया त्रिभुवने तेजो निजं दर्शयन्**
**पृष्ठे वा पुरतः प्रयाति तरणेर्हन्तुं तमोवैरिणम्॥**[1]

एवं प्रकारेण प्रथमे श्लोके सूर्याचन्द्रमसौ राजामात्यौ इति सुन्दरया पद्धत्या उपमां प्रदीय ततः अग्रे **'गणकान् पृच्छति'** इत्यनेन कश्चन प्रश्नम्पस्थापयति। स च इत्थं वर्त्तते -

**भानुश्चेत्प्रतिबिम्बितो जलमये शीतांशुगोले दिवा**
**निस्तेजा निशि सुप्रभः कथमथो किं सूर्यबिम्बा समः।**
**गोलार्धं रविसोज्वलं च सकलं न स्यात्तडागे यथा**
**मासार्धेऽखिलदृश्यतेति गणकान् ज्ञानाह्वयः पृच्छति॥**[2]

जलमयः चन्द्रः स च प्रकाशविहीनो भवति अतः सूर्यः एव चन्द्रगते जले प्रतिबिम्बित इति खलु उच्यते तर्हि सूर्यस्य आकाशे विद्यमानत्वे सति अर्थात् दिवसि चन्द्रः सप्रकाशकः एवमेव सति सूर्याभावे चन्द्रः अल्पप्रकाशकः इति तु युज्यते। परं कुतः तद्विपरीतं दृश्यते लोके, सत्वे सूर्यस्य प्रकाशहीनः चन्द्रः सूर्याभावे तु सप्रभः भवति। तथा च एतादृशः चन्द्रः कुतः सूर्यस्य प्रतिकूलं व्यवहरति? इत्येषो प्रथमः प्रश्नः। अपरस्तावत् यदि सूर्यकिरणैरेव चन्द्रः प्रकाशम् आप्नोति तर्हि चन्द्रबिम्बस्य अर्धभाग एव उज्वलसहितं भवति सम्पूर्णं बिम्बं सोज्वलेन भवितव्यम्। यथा प्रकाशयुक्तस्य सर्वदा तडागे प्रतिबिम्बः

दृश्यते। चन्द्रस्यापि जलमयत्वात् सर्वदा प्रतिबिम्बः भवेत् तत्र सूर्यस्य, येन चन्द्रः प्रतिदिनं दृश्येत। मासार्धे नाम पूर्णिमायां तु सकलं शुक्लं भवति इत्येवं कथमिति? द्वितीयोऽयं प्रश्नः। एवं प्रकारेण ज्ञानराजः प्रश्नद्वयं करोति सिद्धान्तकारैः।

प्रकृते चन्द्रः रात्रावेव कथं दृश्यते दिने कुतो न यद्यपि विपरीतं भवितव्यम् इति प्रथमः प्रश्नः चन्द्रः सूर्यस्य विद्यमाने दिनकालेऽपि प्रकाशयुक्त एव भवति परं सूर्यस्य प्रकाशवशात् अस्माकं यो दृष्टिदोषो जायते तद्वशात् सूर्यमतिरिच्य चन्द्रनक्षत्रादीनि न दृश्यन्ते। परं तदापि सप्रभ एव भवति चन्द्रः इत्येवं प्रकारेण समाधानार्हः। द्वितीयस्तावत् यदि रविना एव प्रकाशवत्वं चन्द्रस्य सिद्ध्यति तर्हि जलमयत्वात् चन्द्रस्य तडागवत् कुतो न सर्वदा शुक्लः इत्यस्य चन्द्रस्य गतिशीलत्वात् अस्माकं स्पर्शरेखा सर्वदा भिद्यते येन प्रकाशयुक्तः कश्चन एव भागः दृश्यते इत्येवं समाधीयते।

**चन्द्रकलाह्रासवृद्धिहेतुः -**

ज्ञानराजः चन्द्रमण्डलस्य उपमां वक्ति यत् - यथा रविकिरणैः युक्तानि पद्मपुष्पाणि यथा सरसि विकसितानि। तद्वत् चन्द्रमण्डलमपि रविसम्मुखो यो भागः चन्द्रस्य सः सूर्यकिरणैः युक्तः सन् सोऽर्धः भागः तेजोवान् भूत्वा उज्ज्वलेन विलसति इत्यनेन प्रकारेण कमलगोलेन सादृश्यं दर्शयति चन्द्रमण्डलस्य ज्ञानराजः। तदुक्तमत्र श्लोके यत् -

**कमलगोलमयं शशिमण्डलं कमलिनीशकलैर्विलसत्यलम् ।**

**तदिनसम्मुखमिन्दुतनोर्दलं रविकर प्रसरैरिदमुज्ज्वलम्॥**[3]

एवमेव अमायां तिथौ चन्द्रमसः अभावस्य लोकप्रसिद्धं हेतुं प्रतिपाद्य कथ्यते यत् अयमेव अभावहेतुर्भवतु नाम का हानिस्तत्र इति। तत्रोच्यते चन्द्रः सुधामण्डलम् अर्थात् अमृतयुक्तः इति दृष्टान्तेषु श्रूयत एव। तदमृतं कृष्णपक्षस्यान्ते सर्वे सुराः देवताः पिबन्ति, येन चन्द्रमण्डलगतामृतं लुप्यते। अतः अमावस्यायां चन्द्रः न दृश्यते। एतदेव कारणं वेदेषु पुराणादिकेषु शास्त्रादिष्वपि प्रोक्तम्। अतः तदेव सत्यं कथं न भवेत् अर्थात् कृष्णपक्षान्तगस्य चन्द्राभावस्य अयमेव हेतुः भवेत् इति उच्यते। तदुक्तं ज्ञानराजेन दार्ष्टान्तिकशैल्याम् -

**सुराः सुधामण्डलमापिबन्ति दिनेषु कृष्णप्रतिपन्मुखेषु।**

**तदैव सत्यं न भवेत्कथं वा पुराणवेदागमशास्त्रमूलम्॥**[4]

अस्मिन् प्रसङ्गे उपर्युक्ते विषये वैज्ञानिकाः विज्ञानाभावं प्रकटयन् कथं देवानाममृतपानं तेन च कथं चन्द्रस्य कलासु ह्रासवृद्धित्वं सिद्ध्यति इति पृच्छेयुः। यतः अस्माकं दृक्सूत्रगतस्य गतिमतः चन्द्रमसः स्थानवैविध्यात् अर्थात् सर्वदा एकः एव भागः न दृश्यते चन्द्रस्य, येन सूर्यकिरणैर्युक्तभागस्य न्यूनाधिक्येन दर्शनम् इति किल कारणं तत्र। एतादृशाशङ्कायां सत्यां ज्ञानराजः विज्ञानतत्वं पुरस्कुर्वन् पुराणवेदादिकमतं दृढयति। अत्र देवाः इत्यनेन सूर्यस्य किरणानां ग्रहणं क्रियते नान्येषाम्। तस्मात् ते देवाः अर्थात् सूर्यकिरणाः एव कलाः प्रदीयन्ते तच्च सिते नाम शुक्लपक्षे चन्द्रस्य कलान् यच्छन्ति असिते कृष्णपक्षे कलाः हरन्तीति। अर्थात् चन्द्रस्य यो बिम्बभागः अस्मदृक्सूत्रगतो भवति तत्र किरणानां प्रभावात् कलानां वृद्धिक्षयः इत्यनेन प्रकारेण ज्ञानराजः विज्ञानतत्वं प्रदर्शयन् पुराणादिकमभिमतं समर्थयन् उच्यते -

**वेदे सुराः सूर्यकराः प्रसिद्धास्त एव यच्छन्ति कलाः क्रमेण।**

**सितेऽसिते ते क्रमशो हरन्ति तदेव वान्यत्वमिदं मतं वा॥**[5]

एतावता ज्ञानराजः चन्द्रस्य वृद्धिह्रासविषये बहुविधानि कारणानि प्रतिपाद्य पौराणिकमतं विज्ञानानुसारं निरूपयन् तन्मयान्तरङ्गो भूत्वा चन्द्रवैशिष्ट्यपरकमेकम् ऋग्वेदान्तर्गतम् आशीर्वचनात्मकं मन्त्रं प्रददाति। तच्च -

**नवोनवोऽयं भवतीति जायमानोऽह्नकेतुः सदुषोग्रमेति।**

**भागं हि देवेषु ददाति चन्द्रः सुदीर्घमायुस्तिरते तथैव॥**[6]

ऋग्वेदस्य दशममण्डलस्य पञ्चाशीतितमे अध्याये एकोनविंशतितमं मन्त्रं वर्त्तते -

**नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम्।**

**भागं देवेभ्यो विदधात्यायन्प्र चन्द्रमास्तिरते दीर्घमायुः॥**[7]

एतदेव मन्त्रं प्रकृतग्रन्थे ग्रन्थकर्त्ता क्वचित् परिवर्त्य श्लोकरूपेण दीयते। ज्ञानराजः अत्र अनेने श्लोकेन चन्द्रस्य वैशिष्ट्यं दिदृक्षते। अस्य अयमर्थः यत् प्रतिदिनं चन्द्रः नूतनतया उद्भवति तथा च अह्नकेतुः इत्यस्य वेदभाष्यादिषु दिनानां ज्ञापकोऽयं चन्द्रः इत्यर्थः प्रोक्तः यतः चन्द्रवशादेव मासानि दिनानि पक्षे तिथीनां च निर्णयो भवति। तथा च **उषसामेत्यग्रम्** इत्यस्य भाष्ये कृष्णपक्षस्य अन्ते चन्द्रः उषसः अग्रे चलति इत्यर्थः प्रदत्तः। एवमेव चन्द्रः दर्शं पौर्णञ्च निर्मीय देवेभ्यः हविः पितृणाञ्च स्वधा देया इति भागदानं विदधाति। एतादृशः चन्द्रः स्वकौमुद्या औषधादिकं रसमुत्पाद्य सर्वेषाम् आयुः वर्धयति इति भावः।

**चन्द्रस्य भुजसाधनम् -**

आदौ रविचन्द्रयोः क्रान्ती संसाध्य तयोः संस्कारः कार्यः। तद्यथा तयोः क्रान्त्योः समदिक्त्वे अन्तरम् भिन्नदिक्त्वे सति योगः कार्यः। तस्य ज्या साधिते सति क्रान्तिसंस्कारज्या उपलभ्यते। अधुना रवेः चन्द्रः उत्तरदक्षिणे यस्यां दिशि भवति प्राप्तस्याः क्रान्तिसंस्कारज्यायाः सैव दिगिति विज्ञेया। अर्थात् सा क्रान्तिसंस्कारज्या चन्द्रदिक्का भवतीति बोध्यम्। एवं साधिता क्रान्तिसंस्कारज्या एव भुजज्या। सा भुजज्या सूर्यास्तकालिकस्य चन्द्रस्य छायाकर्णेन सङ्गुणनीया। तदा यत्फलं लभ्यते तत् द्वादशगुणितया अक्षज्यया संस्कार्यम्। तच्च संस्कारः यदि पूर्वप्राप्तक्रान्तिसंस्कारज्या यद्युत्तरा तर्हि तत्फलं द्वादशगुणितायाः अक्षज्यायाः विशोधनीयम्। यदि सा दक्षिणा तदा तस्मिन् योजनीयमित्यर्थः लभ्यते। तदानीं प्राप्तं फलं लम्बज्यया भाजनीयम्। तेन भुजः प्राप्यते। सो भुजः चन्द्रदिक्कः इति ज्ञेयः अर्थात् सूर्याच्चन्द्रः यद्दिक्कः भवति तद्दिक्कः इति। अत्र कोटिस्तु द्वादशाङ्गुलशङ्कुमिता। तयोः भुजकोट्योः वर्गयुतेः मूलं कर्णः भवति। तदुक्तं ज्ञानराजेन -

**अपमयोर्विवरं समदिक्कयोः रविनिशाकरयोर्युतिरन्यथा ।**

**भवति यत्र दिवाकरतः शशी दिगथ संस्कृतिजातभुजज्यका॥**

**द्युदलजेन्दुभाश्रुतिसङ्गुणा रविगुणाक्षगुणात्परिशोधिता।**

**इह युतायदि दक्षिणदिक् हृतात्तदनु लम्बगुणेन भवेद् भुजः॥**

**रविमितात्र हि कोटिमितः श्रुतिर्मुनिवरैरुदिता सुखसिद्धये।**[8]

चन्द्रशृङ्गोन्नतिसाधनार्थं सूर्यसिद्धान्तेऽपि भुजसाधनप्रक्रिया इत्थमेव प्रतिपादिता। भास्कराचार्योक्ता भुजसाधनप्रक्रिया तु प्रायशः समाना

परन्तु तत्साधने विभिन्नान्युपकरणानि स्वीकृतानि। सा च प्रक्रिया यथा आदौ रवेः चन्द्रमसः अग्रा एवं च शङ्कुतलं संसाधनीयम्। तयोः अग्राशङ्कुतलयोः एकदिक्त्वे योगे भिन्नदिक्त्वे अन्तरे कृते सति रविचन्द्रयोः भुजौ लभ्येते। तदा तयोः रविचन्द्रभुजयोः एकदिक्त्वे अन्तरं भिन्नदिक्त्वे योगः इति संस्कारो करणीयः। तदा चन्द्रशृङ्गोन्नतेः स्फुटः भुजः लभ्यते। तत्र चन्द्रभुजस्य या दिक् सैव स्फुटभुजस्यापि दिक् भवति। यदि चन्द्रभुजः सूर्यभुजादल्पः तर्हि स्पष्टभुजस्य चन्द्रभुजदिक्तः विपरीता दिङ्ज्ञेया। अत्र पूर्वं रविचन्द्रयोः एकदिक्त्वेऽन्तरमिति यदुक्तं तत्र उभयोः तुल्या दिक् भवति चेदपि चन्द्रभुजस्य या दिक् सैव स्फुटभुजस्य ज्ञेया।

वस्तुतः अत्र सूर्यास्तकाले रवेः क्षितिजगतत्वात् शङ्कुशङ्कुतलयोश्चाभावात् तत् शङ्कुमूल पूर्वापरसूत्रान्तररूपः अग्रातुल्य एव रविभुजः भवति। तस्मात् लम्बज्यात्रिज्याक्षज्या इति अक्षक्षेत्रस्य एवञ्च कुज्याग्राक्रान्तिज्या इति अक्षक्षेत्रेण सह साजात्येन अत्र अनुपातः। यदि लम्बज्याकोट्या त्रिज्याकर्णः लभ्यते तर्हि रविक्रान्तिज्याकोट्या किमित्यनेन अग्रा फलं लभ्यते सैवात्र रविभुजो भवति। चन्द्रस्य तु सूर्यास्तकाले क्षितिजादूर्ध्वं गतत्वात् चन्द्रशङ्कुशङ्कुतलयोः सत्वात् चन्द्रस्य अग्राशङ्कुतलसंस्कारेण भुजः लभ्यते। पूर्वोक्तविधानेन चन्द्रस्याग्रां संसाध्य ततः शङ्कुतलमपि संसाधनीयम्। तयोः संस्कारेण चन्द्रभुजः लभ्यते इत्यर्थः। वस्तुतः स्वकीययोः गोलस्थयोः सूर्याचन्द्रमसोः केन्द्रान्तरमेव चन्द्रशृङ्गोन्नतौ कर्णः भवति। तस्मात् सूर्याचन्द्रमसोः केन्द्रगतपूर्वापरसमानान्तरधरातलयोः यल्लम्बरूपम् उत्तरदक्षिणमन्तरं भवति तत् रविचन्द्रयोः क्रान्तिज्ययोः संस्कारतुल्यं क्षितिजे भुजः भवति। कोटिस्तु तयोः रविचन्द्रयोः केन्द्रगतयाम्योत्तरवृत्तसामानान्तरधरातलयोः लम्बात्मकं पूर्वपश्चिमान्तरम्। अनयोः भुजकोटिवर्गयोः योगमूलेन तयोः शङ्कुमूलान्तरश्च कर्णः। अयमेव कर्णः शृङ्गोन्नतौ वास्तविकः भुजः इति विज्ञेयम्।

**चन्द्रबिम्बस्य शुक्लाङ्गुलसाधनम् -**

अभीष्टकाले रविचन्द्रयोः स्फुटौ संसाध्य तौ कलासु परिवर्तनीयौ। तदा चन्द्रस्फुटकलाभ्यः रविस्फुटकलाः विशोध्य नवशतेन विभाजनीयम्। तदा चन्द्रस्य कलात्मकः शुक्लभागः प्राप्यते। परमनेन प्रकारेण प्राप्तः शुक्लभागः मध्यमः भवति। मध्यमः सः शुक्लभागः पुनः तात्कालिकैः चन्द्रबिम्बाङ्गुलैः सङ्गुण्य द्वादशसङ्ख्यया विभाजनीयः। तदा चन्द्रशृङ्गस्य परिलेखयोग्यः वास्तविकः शुक्लाङ्गुलभागः लभ्यते। तदुक्तं सिद्धान्तसुन्दरे -

**तपनहीनशशाङ्ककलाहृता नवशतैः सितमत्रकलादिकम्॥**
**तदिन्दुबिम्बाङ्गुलसंख्ययाघ्नं सूर्योद्धृतं स्यात् परिलेखयोग्यम्।**[9]

अत्रोपपत्तिर्यथा - "दर्शः सूर्येन्दु सङ्गमः" इति वचनात् अमान्ते अस्माकं दृक्सूत्रे रविचन्द्रयोः संयोगात् अन्तरविहीनौ भवतः। तदानीं चन्द्रे शुक्लभागस्य अभावः। पूर्णिमान्ते च पुनः रविचन्द्रयोः मध्यगतमन्तरं षड्राशिमितम् अथवा चक्रार्धांशमितं भवति। तदाऽखिलं चन्द्रबिम्बं श्वेतयुतं दृश्यते। तदा तत्र चन्द्रबिम्बं मध्यममानेन द्वादशाङ्गुलमितं भवति। तस्मात् तन्मध्येऽनुपातः क्रियते यथा - यदा चक्रार्धकलातुल्येन सूर्याचन्द्रमसोः अन्तरेण द्वादशाङ्गुलमितः शुक्लभागः लभ्यते तदा अभीष्टसूर्य-चन्द्रान्तरकलाभिः किमित्यनेन मध्यममानेन शुक्लाङ्गुलमानं लभ्यते। परं तात्कालिकेन स्फुटबिम्बेन यदि शुक्लमानमपेक्षितं तदा अनुपातः - यदि द्वादशाङ्गुलमितेन तात्कालिकं स्फुटबिम्बमानं लभ्यते तर्हि इष्टबिम्बेन किमित्यनेन स्फुटम् अङ्गुलाद्यं शुक्लमानं लभ्यते। इत्येवं प्रकारेण चन्द्रशृङ्गः साधितुं शक्यः।

**सारांशः** - प्रतिदिनं रात्रौ दृश्यमानस्य चन्द्रस्य या शृङ्गाकृतिः, तामाधारीकृत्य विज्ञेयाः लोकसुभिक्षदुर्भिक्षौ युद्धभय इत्यादयः नेके विषयाः संहितादिषु प्रोक्ताः। तादृश्याः शृङ्गोन्नतेः साधनविधिं ज्ञानराज अतिविस्तरेण प्रत्यपादयत्। वैज्ञानिकतथ्येन सह पुराणवचनानां समर्थनम् अकरोत्। तत्र वेदप्रमाणमपि प्रदत्तं ग्रन्थकर्त्रा ज्ञानराजेन। ज्ञानराजनिरूपितसाधनप्रक्रिया सूर्यसिद्धान्तगतप्रक्रियया सादृश्यं भजते। एवं प्रकारेण सिद्धान्तसुन्दरे ज्ञानराजेन प्रोक्तया साधनप्रक्रियया शृङ्गोन्नतिं विज्ञाय ततः तया साधितचन्द्रशृङ्गोन्नत्या लोकोपकारकाणि बहूनि शुभाशुभफलानि विज्ञायन्ते।

**सन्दर्भग्रन्थसूची**


- ज्ञानराजस्य सिद्धान्तसुन्दरः, ए.श्रीपाद भट्, न्यू भारतीयबुक् कार्परेशन्, नवदेहली
- सूर्यसिद्धान्तः, चौखम्बा संस्कृत भवन्, वाराणसि, २०१५
- सिद्धान्तशिरोमणिः, भास्कराचार्यः, चौखम्बा संस्कृत संस्थान्, वारणासि, २०१४
- वास्तवचन्द्रशृङ्गोन्नतिसाधनम्,महामहोपाध्याय सुधाकर द्विवेदि, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वरणासी, १९९८
- श्रीपतेः सिद्धान्तशेखरः, बबुवाजी मिश्र, कल्कत्ता युनिवर्सिटि प्रेस्, १९३२
- ब्रह्मगुप्तस्य ब्रह्मस्फुटसिद्धान्तः, इण्डियन् इन्स्टिट्यूट् आफ् एस्ट्रोनोमिकल् एण्ड् सेन्स्क्रिट् रीसर्च्, नई दिल्ली, १९९६
- कमलाकरभट्टस्य सिद्धान्ततत्त्वविवेकः,सत्यदेव शर्मा, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०२३


**सन्दर्भः -**

[1]सिद्धान्त सुन्दरः – चन्द्रश्रुङ्गोन्नत्यधिकारः - १

[2]सिद्धान्त सुन्दरः – चन्द्रश्रुङ्गोन्नत्यधिकारः - २

[3]सिद्धान्त सुन्दरः – चन्द्रश्रुङ्गोन्नत्यधिकारः - ३

[4]सिद्धान्त सुन्दरः – चन्द्रश्रुङ्गोन्नत्यधिकारः - ४

[5]सिद्धान्त सुन्दरः – चन्द्रश्रुङ्गोन्नत्यधिकारः - ६

[6]सिद्धान्त सुन्दरः – चन्द्रश्रुङ्गोन्नत्यधिकारः - ५

[7]ऋग्वेदः – १०-८५-१९

[8]सिद्धान्त सुन्दरः – चन्द्रश्रुङ्गोन्नत्यधिकारः – ७,८

[9]सिद्धान्त सुन्दरः – चन्द्रश्रुङ्गोन्नत्यधिकारः - ९